अञ्ज+इठ।) सूर्य्यः। इत्युणादिकोषः॥

अञ्जीरं, क्ली, (अञ्ज+भावे इन् स्त्रियां वा ङीप् अञ्जीम् अभिकारित्वादि गुणं राति ददाति अञ्जी आतोऽनुपसर्गे इति कर्त्तरि कः। अथवा अञ्ज+ ईरम्) स्वनामख्यातफलवृक्षविशेषः। आँजिर+ इति पेयारा इति च भाषा। तत्पर्य्यायः। मञ्जुलं२ काकोदुम्बरिकाफलं ३। अस्य गुणाः। शीतलत्वं। स्वादुत्वं। गुरुत्वं। वायुपित्तरक्तक्रिमिशूलहृत्पीड़ाकफमुखवैरस्यनाशित्वं। अभिकारित्वञ्च। लघ्वञ्जीरं तस्मादल्पगुणं। इति राजवल्लभराजनिर्घण्टौ॥

अटनं, क्ली, (अट्+भावे ल्युट्) भ्रमणं। (यथा सर्व्वज्ञत्वमधीश्वरत्वमगमत् त्वां मास्तु भिक्षाटनं। इति घण्टाकर्णः॥)

अटनिः, स्त्री, (अटति तया गच्छति यत्र अट्+ अधिकरणे अनि) धनुरग्रभागः। धनुकेर ऊल् इति भाषा। इत्युणादिकोषः॥

अटनी, स्त्री, (अटनि+स्त्रियाम्वा ङीप्) अटनिः। धनुष्कोटिः। इत्यमरः॥ (यथा उत्तरचरिते। ध्वनदगुरुगुणाटनीकणत्कराणकोलाहलं)॥

अटरूषः, पुं, पतत्यनेन वासकवृक्षः। इत्यमरः॥

अटरूषः, पुं, (अटति मृत्युपार्श्वे पतत्यनेन अट+ घञर्थे कः। अटं कासाख्यरोगं रोषति नाशयति रुष्+कर्त्तरि कः। अथवा रूष्+कर्त्तरि कः अटस्य रूषो वा षष्ठीतत्पुरुषः। वासकः कासनाशक इति वैद्यके) वासकवृक्षः। इत्यमरटीकायां रायमुकुटः॥

अटविः, स्त्री, (अटति दार्ढ्यार्थे गच्छति यत्र अट्+ अधिकरणे अवि पद्माय्रिति वनं व्रजेदिति।) वनं। इति रायमुकुटः॥

अटवी, स्त्री, (अटवि+स्त्रियां ङीप्) वनं। इत्यमरः। (यथा रामायणे। आनर्त्तांश्चैव मार्गध्वं कान्ताराण्यटवीस्तथा)॥

अटा, स्त्री, (अट्+भावे अङ् ततष्टाप्) पर्य्यटनं। भ्रमणं। इति रत्नकोषः नीलकण्ठश्च॥

अटाट्या, स्त्री, (पौनःपुन्येन अटनं भ्रमणम् अट्+ सूचिसूत्रिमूत्र्यट्यर्त्यादिना यङ्+भावे अ। स्त्रियां टाप्) पर्य्यटनं। इत्यमरः॥ पुनःपुनर्भ्रमणं। अतिशयभ्रमणं। इति व्याकरणं॥) अट्ट क तीक्ष्णे। अनादरे। इति कविकल्पद्रुमः॥ टद्वयान्तः। क अट्टयति। एकटकार उति रामः॥ तीक्ष्णमल्पीभावः। इति दुर्गादासः॥

अट्ट ङ अतिक्रमे। वधे। इति कविकल्पद्रुमः॥ मूर्द्धन्यवर्गाद्योपधः। ङ अटिट्टिषते दन्त्यवर्गाद्योपधः। ङ अतिट्टिषते। दन्त्यवर्गतृतीयोपधः। ङ अट्टितिषते खलं राजा। इति दुर्गादासः॥

अट्टं, क्ली, (अट्ट+अच्) शुष्कं। भक्तं। अन्नं। इति मेदिनी भूरिप्रयोगश्च॥

अट्टः, पुं, (अट्टते एकं गृहमतिक्रम्य यत्र गृहे गच्छति अट्ट+अधिकरणे घञ्) क्षौमः। इत्यमरः॥ हर्म्म्यादिगृहं। इति भरतः॥ प्राकाराग्रस्थितरणगृहं। इति कौटिल्यः। अट्टेति ख्यातगृहविशेषः। इति कोक्कटः॥ प्राकारमण्डपस्योपरि शाला। इति केचित्॥ हर्म्म्यादिवातकुटिका। इति केचित्॥ मण्डपोपरि हर्म्म्यपृष्ठं। इति केचित्॥ प्राकारधारणार्थोऽभ्यन्तरे क्षौमाख्योऽट्टः। इति भट्टः॥ अतिशयः। इति मेदिनी॥ हट्टः इति हेमचन्द्रः॥

अट्टट्ट अ (वीप्सायाद्विर्व्वचनम् शकन्ध्वादित्वात् पररूपत्वमस्य अट्टट्टहासमशिवं शिवदूती चकार हेति चण्डी) अत्युच्चं। इति जटाधरः॥

अट्टनं (क्ली) चक्रफलास्त्रं। इति त्रिकाण्डशेषः॥

अट्टहासः, पुं, महत्तरो हासः। शब्दयुक्तहास्यं। इति हेमचन्द्रः॥ (यथा देवीमाहात्म्ये। देवीननादोच्चैः साट्टहासं मुहुर्मुहुः॥ त्र्यम्बकस्याट्टहासः॥ मेघदूते)॥

अट्टहासकः, पुं, (अट्टं सातिशयं हासकः अतिश्वेतपुष्पत्वात् हास्यकारीव द्वितीयातत् पुरुषः) कुन्दपुष्प वृक्षः। इति राजनिर्घण्टः॥

अट्टहासी [न्] पुं, (अट्टं सदानन्दत्वात् सातिशयं हसति अट्ट+हस+णिनि उपपद समासः) शिवः। इति हेमचन्द्रः॥

अट्टालः, पुं, (अट्टवत् प्रासादगृहवत् अलति भवति अल+अच्) प्राकारादुपरितनमुन्नतस्थानं। इति श्रीधरस्वामी॥ यथा। भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं। इति श्रीभागवतं॥

अट्टालकः, पुं, (अट्टवत् प्रासादगृहवत् अलति भवति अल्+अच् स्वार्थे कन्) उपरितनगृहं। अट्टालिकोपरि गृहं। तत्पर्य्यायः। क्षौमः २ अट्टः ३। इति हेमचन्द्रः॥

अट्टालिका, स्त्री, (अट्टाल+स्वार्थे कन् स्त्रियां टाप्) राजगृहं। तत्पर्य्यायः।
नृपागारं २ हर्म्म्यं ३ सौधं ४ धवलागारं ५।
इति जटाधरः॥ (राजतरङ्गिनी, अटित्वाट्टालिकादिभ्यो देशेभ्यः।)

अट्टालिकाकारः, पुं, (अट्टालिकां करोति यः अट्टालिका+कृ+अण् उपपद समासः प्रासादकारकः) शूद्रागर्भे चित्रकारौरसजातजातिविशेषः। तस्य कर्म्म गृहनिर्म्माणादि। राज इति थेकर इति च भाषा।

"कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः।
वभूवाट्टालिकाकारः पतितो जारदोषतः"।

इति ब्रह्मवैवर्त्तपुराणं॥

अट्या, स्त्री, (अटनम् अट्+भावे क्यप् स्त्रियां टाप् समस्या इति वत्) परिभ्रमणं। पर्य्यटनं। इत्यमरटीकायां रायमुकुटः॥ यथा,—

"तीर्थ्यन्त्रिकं वृथाट्या च कामजो दशको गणः"।

इति स्मृतिः॥

अठ इ ङ गतौ इति कविकल्पद्रुमः॥ इ (कर्म्मणि) अण्ठ्यते ङ अण्ठते। इति दुर्गादासः॥

अठ गते। इति कविकल्पद्रुमः॥ अठति। इति दुर्गादासः॥

अड ऋ न व्याप्तौ (स्वादिं सेट्।) इति कविकल्पद्रुमः॥ ऋ वैदिकः। न अड्नोति। इति दुर्गादासः॥

अड उद्यमे। (भ्वादिं सेट् परं।) इति कविकल्पद्रुमः॥ अडति लोकः सुखाय। इति दुर्गादासः॥

अड्ड अभियोगे। इति कविकल्पद्रुमः॥ मूर्द्धन्यवर्गतृतीयोपधः। (भ्वादिं सेट् परं अड्ड्+सन् लट् तिप्) अडिड्डिषति। क्विपि संयोगान्तलोपे अड्। अभियोगः समाधानं। अड्डति पक्षं विद्वान्। अभि समन्तात् योगोऽभियोग इति गोविन्दभट्टः॥ इति दुर्गादासः।

अण रवे। इति कविकल्पद्रुमः॥ अणति। रवः शब्दः। इति दुर्गादासः॥

अण य ङ जीवने। प्राणने। इति कविकल्पद्रुमः॥ य ङ अण्यते जनो दुःखेन जीवतीत्यर्थः। इति दुर्गादासः॥

अणकः, त्रि, (अण्+अच् कुत्सायां कन्) कुत्सितः अधमः। इत्यमरः॥

अणव्यं, क्ली, (अणोः सूक्ष्मशस्यस्य चीनादिकस्य भवनमुत्पत्तिस्थानमिति यावत् अणु+यत्) आणवीनं (अणोः, सूक्ष्मशस्यस्य चीनादिकस्य भवनमुत्पत्तिस्थानमिति यावत् अण्+खञ् तस्य इनः आदिवृद्धिश्च)। अणुधान्योत्पादकक्षेत्रं। इति रायमुकुटः॥

अणिः, पुं, स्त्री (अणति शब्दायते अण्+इन् स्त्रियां वा ङीप्) अक्षाग्रकीलकः। रथचक्राग्रस्थित कीलः। इत्यमरः॥ अस्रिः। सूच्याद्यग्रभागः। सीमा। इति मेदिनी॥ तस्य रूपान्तरं। अणी। आणिः (अणति शब्दायते अण्+इञ्, अजादिभ्यश्च इति इञ्, आजि इति वत्)। इत्यमरटीका॥

अणिमा [न्] पुं, (अणु+भावे इमनिच। अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ईशित्वञ्च वशित्व ञ्च तथा कामावसायिता इति सांख्यतत्त्व कौमुद्याम्) अणोर्भावः। अणुत्वं। सूक्ष्मता। इति व्याकरणं। अष्टविधैश्वर्य्यमध्ये ऐश्वर्य्यविशेषः। इत्यमरः॥ यत्प्रभावात् देवाः सिद्धाश्च सूक्ष्मीभूय सर्व्वत्र विचरन्ति कैश्चिदपि न लक्ष्यन्ते। इति तट्टीका॥

("अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता"॥
इति आगमः।)

अणीयः, [स्] त्रि, अतिशयेन अणुः अणु+ईयसुन्) अत्यल्पं। अतिसूक्ष्मं। इत्यमरः॥ (यथा मनुः,—

"प्रशासितारं सर्व्वेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परं"॥)

अणु, त्रि, (अणति सूक्ष्मत्वं गच्छति अण्+उन्। लवलेशकणाणवः इत्यमरः) क्षुद्रं। सूक्ष्मं। इति मेदिनी॥

अणुः, पुं, (अण्+उन्) लेशः। व्रीहिविशेषः। सूक्ष्मधान्यं। चिना इत्यादि भाषा। इत्यमरः। (यथा मनुः। न गृह्णीयात् शुल्कमण्वपि॥)

अणुकः, त्रि, (अणुप्रकारः अणु+स्थूलादित्वात्